# Dakini Stotram

# ડાકિનીસ્તોત્રમ્

## Document Information

Text title : Dakini Stotram

File name : DAkinIstotrarudrayAmalatantra.itx

Category : devii, dashamahAvidyA, stotra, devI, yoginI

Location : doc_devii

Transliterated by : http://muktalib5.org

Proofread by : http://muktalib5.org, Daksha

Description-comments : shrIrudrayAmale uttaratantre siddhamantraprakaraNe

Latest update : March 29, 2013

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# ડાકિનીસ્તોત્રમ્

આનન્દભૈરવી ઉવાચ
અથ વક્ષ્યે મહાકાલ મૂલપદ્મવિવેચનમ્ ।
યત્ કૃત્વા અમરો ભૂત્વા વસેત્ કાલચતુષ્ટયમ્ ॥ ૧॥

અથ ષટ્ચક્રભેદાર્થે ભેદિનીશક્તિમાશ્રયેત્ ।
છેદિનીં સર્વગ્રન્થીનાં યોગિનીં સમુપાશ્રયેત્ ॥ ૨॥

તસ્યા મન્ત્રાન્ પ્રવક્ષ્યામિ યેન સિદ્ધો ભવેન્નરઃ ।
આદૌ શૃણુ મહામન્ત્રં ભેદિન્યાઃ પરં મનુમ્ ॥ ૩॥

આદૌ કાલીંસમુત્કૃત્ય બ્રહ્મમન્ત્રં તતઃ પરમ્ ।
દેવ્યાઃ પ્રણવમુદ્ધૃત્ય ભેદની તદનન્તરમ્ ॥ ૪॥

તતો હિ મમ ગૃહ્ણીયાત્ પ્રાપય દ્વયમેવ ચ ।
ચિત્તચઞ્ચીશબ્દાન્તે માં રક્ષ યુગ્મમેવ ચ ॥ ૫॥

ભેદિની મમ શબ્દાન્તે અકાલમરણં હર ।
હર યુગ્મં સ્વં મહાપાપં નમો નમોઽગ્નિજાયયા ॥ ૬॥

એતન્મન્ત્રં જપેત્તત્ર ડાકિનીરક્ષસિ પ્રભો ।
આદૌ પ્રણવમુદ્ધૃત્ય બ્રહ્મમન્ત્રં તતઃ પરમ્ ॥ ૭॥

શામ્ભવીતિ તતશ્ચોક્ત્વા બ્રાહ્મણીતિ પદં તતઃ ।
મનોનિવેશં કુરુતે તારયેતિ દ્વિધાપદમ્ ॥ ૮॥

છેદિનીપદમુદ્ધૃત્ય મમ માનસશબ્દતઃ ।
મહાન્ધકારમુદ્ધૃત્ય છેદયેતિ દ્વિધાપદમ્ ॥ ૯॥

સ્વાહાન્તં મનુમુદ્ધૃત્ય જપેન્મૂલામ્બુજે સુધીઃ ।
એતન્મન્ત્રપ્રસાદેન જીવન્મુક્તો ભવેન્નરઃ ॥ ૧૦॥

તથા સ્ત્રીયોગિનીમન્ત્રં જપેત્તત્રૈવ શઙ્કર ।

ૐ ઘોરરૂપિણિપદં સર્વવ્યાપિનિ શઙ્કર ॥ ૧૧॥

મહાયોગિનિ મે પાપં શોકં રોગં હરેતિ ચ ।
વિપક્ષં છેદયેત્યુક્ત્વા યોગં મય્યર્પય દ્વયમ્ ॥ ૧૨॥

સ્વાહાન્તં મનુમુદ્ધૃત્ય જપાદ્યોગી ભવેન્નરઃ ।
ખેચરત્વં સમાપ્નોતિ યોગાભ્યાસેન યોગિરાટ્ ॥ ૧૩॥

ડાકિનીં બ્રહ્મણા યુક્તાં મૂલે ધ્યાત્વા પુનઃ પુનઃ ।
જપેન્મન્ત્રં સદાયોગી બ્રહ્મમન્ત્રેણ યોગવિત્ ॥ ૧૪॥

બ્રહ્મમન્ત્રં પ્રવક્ષ્યામિ તજ્જાપેનાપિ યોગિરાટ્ ।
બ્રહ્મમન્ત્રપ્રસાદેન જડો યોગી ન સંશયઃ ॥ ૧૫॥

પ્રણવત્રયમુદ્ધૃત્ય દીર્ઘપ્રણવયુગ્મકમ્ ।
તદન્તે પ્રણવત્રીણિ બ્રહ્મ બ્રહ્મ ત્રયં ત્રયમ્ ॥ ૧૬॥

સર્વસિદ્ધિપદસ્યાન્તે પાલયેતિ ચ માં પદમ્ ।
સત્ત્વં ગુણો રક્ષ રક્ષ માયાસ્વાહાપદં જપેત્ ॥ ૧૭॥

ડાકિનીમન્ત્રરાજઞ્ચ શ ૃણુષ્વ પરમેશ્વર ।
યજ્જપ્ત્વા ડાકિની વશ્યા ત્રૈલોક્યસ્થિતિપાલકાઃ ॥ ૧૮॥

યો જપેત્ ડાકિનીમન્ત્રં ચૈતન્યા કુણ્ડલી ઝટિત્ ।
અનાયાસેન સિદ્ધિઃ સ્યાત્ પરમાત્મપ્રદર્શનમ્ ॥ ૧૯॥

માયાત્રયં સમુદ્ધૃત્ય પ્રણવૈકં તતઃ પરમ્ ।
ડાકિન્યન્તે મહાશબ્દં ડાકિન્યમ્બપદં તતઃ ॥ ૨૦॥

પુનઃ પ્રણવમુદ્ધૃત્ય માયાત્રયં તતઃ પરમ્ ।
મમ યોગસિદ્ધિમન્તે સાધયેતિ દ્વિધાપદમ્ ॥ ૨૧॥

મનુમુદ્ધૃત્ય દેવેશિ જપાદ્યોગી ભવેજ્જડઃ ।
જપ્ત્વા સમ્પૂજયેન્મન્ત્રી પુરશ્ચરણસિદ્ધયે ॥ ૨૨॥

સર્વત્ર ચિત્તસામ્યેન દ્રવ્યાદિવિવિધાનિ ચ ।
પૂજયિત્વા મૂલપદ્મે ચિત્તોપકરણેન ચ ॥ ૨૩॥

તતો માનસજાપઞ્ચ સ્તોત્રઞ્ચ કાલિપાવનમ્ ।
પઠિત્વા યોગિરાટ્ ભૂત્વા વસેત્ ષટ્ચક્રવેશ્મનિ ॥ ૨૪॥

શક્તિયુક્તં વિધિં યસ્તુ સ્તૌતિ નિત્યં મહેશ્વર ।
તસ્યૈવ પાલનાર્થાય મમ યન્ત્રં મહીતલે ॥ ૨૫॥

તત્ સ્તોત્રં શ ृણુ યોગાર્થં સાવધાનાવધારય ।
એતત્સ્તોત્રપ્રસાદેન મહાલયવશો ભવેત્ ॥ ૨૬॥

કાલિપાવન સ્તોત્રમ્ ।
બ્રહ્માણં હંસસઙ્ઘાયુતશરણવદાવાહનં દેવવક્ત્ર।
    વિદ્યાદાનૈકહેતું તિમિચરનયનાગ્નીન્દુફુલ્લારવિન્દમ્
વાગીશં વાગ્ગતિસ્થં મતિમતવિમલં બાલાર્કં ચારુવર્ણમ્ ।
    ડાકિન્યાલિઙ્ગિતં તં સુરનરવરદં ભાવયેન્મૂલપદ્મે ॥ ૨૭॥

નિત્યાં બ્રહ્મપરાયણાં સુખમયીં ધ્યાયેન્મુદા ડાકિની।
    રક્તાં ગચ્છવિમોહિનીં કુલપથે જ્ઞાનાકુલજ્ઞાનિનીમ્ ।
મૂલામ્ભોરુહમધ્યદેશનિકટે ભૂવિમ્બમધ્યે પ્રભા।
    હેતુસ્થાં ગતિમોહિનીં શ્રુતિભુજાં વિદ્યાં ભવાહ્લાદિનીમ્ ॥ ૨૮॥

વિદ્યાવાસ્તવમાલયા ગલતલપ્રાલમ્બશોભાકરા।
    ધ્યાત્વા મૂલનિકેતને નિજકુલે યઃ સ્તૌતિ ભક્ત્યા સુધીઃ ।
નાનાકારવિકારસારકિરણાં કર્ત્રીં વિધો યોગિના।
    મુખ્યાં મુખ્યજનસ્થિતાં સ્થિતિમતિં સત્ત્વાશ્રિતામાશ્રયે ॥ ૨૯॥

યા દેવી નવડાકિની સ્વરમણી વિજ્ઞાનિની મોહિની ।
    માં પાતુ પિરયકામિની ભવવિધેરાનન્દસિન્ધૂદ્ભવા ।
મે મૂલં ગુણભાસિની પ્રચયતુ શ્રીઃ કીતીચક્રં હિ મા।
    નિત્યા સિદ્ધિગુણોદયા સુરદયા શ્રીસંજ્ઞયા મોહિતા ॥ ૩૦॥

તન્મધ્યે પરમાકલા કુલફલા બાણપ્રકાણ્ડાકરા
   રાકા રાશષસાદશા શશિઘટા લોલામલા કોમલા ।
સા માતા નવમાલિની મમ કુલં મૂલામ્બુજં સર્વદા ।
    સા દેવી લવરાકિણી કલિફલોલ્લાસૈકબીજાન્તરા ॥ ૩૧॥

ધાત્રી ધૈર્યવતી સતી મધુમતી વિદ્યાવતી ભારતી ।
    કલ્યાણી કુલકન્યકાધરનરારૂપા હિ સૂક્ષ્માસ્પદા ।
મોક્ષસ્થા સ્થિતિપૂજિતા સ્થિતિગતા માતા શુભા યોગિના।
    નૌમિ શ્રીભવિકાશયાં શમનગાં ગીતોદ્ધતાં ગોપનામ્ ॥ ૩૨॥

કલ્કેશીં કુલપણ્ડિતાં કુલપથગ્રન્થિક્રિયાચ્છેદિની।
    નિત્યાં તાં ગુણપણ્ડિતાં પ્રચપલાં માલાશતાર્કારુણામ્ ।
વિદ્યાં ચણ્ડગુણોદયાં સમુદયાં ત્રૈલોક્યરક્ષાક્ષરા।
    બ્રહ્મજ્ઞાનનિવાસિનીં સિતશુભાનન્દૈકબીજોદ્ભતામ્ ॥ ૩૩॥

ગીતાર્થાનુભવપ્રિયાં સકલયા સિદ્ધપ્રભાપાટલામ્ ।
કામાખ્યાં પ્રભજામિ જન્મનિલયાં હેતુપ્રિયાં સત્ક્રિયામ્ ।
સિદ્ધૌ સાધનતત્પરં પરતરં સાકારરૂપાયિતામ્ ॥ ૩૪॥

બ્રહ્મજ્ઞાનં નિદાનં ગુણનિધિનયનં કારણાનન્દયાનમ્ ।
બ્રહ્માણં બ્રહ્મબીજં રજનિજયજનં યાગકાર્યાનુરાગમ્ ॥ ૩૫॥

શોકાતીતં વિનીતં નરજલવચનં સર્વવિદ્યાવિધિજ્ઞમ્ ।
સારાત્ સારં તરું તં સકલતિમિરહં હંસગં પૂજયામિ ॥ ૩૬॥

એતત્સમ્બન્ધમાર્ગં નવનવદલગં વેદવેદાઙ્ગવિજ્ઞમ્ ।
મૂલામ્ભોજપ્રકાશં તરુણરવિશશિપ્રોન્નતાકારસારમ્ ॥ ૩૭॥

ભાવાખ્યં ભાવસિદ્ધં જયજયદવિધિં ધ્યાનગમ્યં પુરાણમ્
પારાખ્યં પારણાયં પરજનજનિતં બ્રહ્મરૂપં ભજામિ ॥ ૩૮॥

ડાકિનીસહિતં બ્રહ્મધ્યાનં કૃત્વા પઠેત્ સ્તવમ્ ।
પઠનાદ્ ધારણાન્મન્ત્રી યોગિનાં સઙ્ગતિર્ભવેત્ ॥ ૩૯॥

એતત્પઠનમાત્રેણ મહાપાતકનાશનમ્ ।
એકરૂપં જગન્નાથં વિશાલનયનામ્બુજમ્ ॥ ૪૦॥

એવં ધ્યાત્વા પઠેત્ સ્તોત્રં પઠિત્વા યોગિરાડ્ ભવેત્ ॥ ૪૧॥

ઇતિ શ્રીરુદ્રયામલે ઉત્તરતન્ત્રે મહાતન્ત્રોદ્દીપને
સિદ્ધમન્ત્રપ્રકરણે ષટ્ચક્રસિદ્ધિસાધને
ભૈરવભૈરવીસંવાદે ડાકિની સ્તોત્રં સમ્પૂર્ણમ્ ॥ પટલઃ ૩૦॥

From Digital Library at http://muktalib5.org

*Dakini Stotram*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*